"निधानभगतं सद्यः सर्व्वं समधिगच्छति ।"
इत्यागमः ॥
(यथा, देवीभागवते । १ । १६ । ३४ ।
"ब्रह्मविद्यानिधानन्तु संसारार्णवतारकम् ॥")
कार्य्यावसाने प्रवेशस्थानम् । यथा,—
"एतन्नानावताराणां निधानं बीजमव्ययम् ॥"
इति श्रीभागवतम् ॥

निधिः, पुं, (निधीयतेऽस्मिन्निति । नि+धा+किः ।) नलिकानामगन्धद्रव्यम् । समुद्रः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । ३ । २२।१० ।
"कन्यां सुकेशीं निधिकन्यकासमां
मेने तदात्मानमनुत्तमञ्च ॥")
जीवकौषधिः । इति शब्दचन्द्रिका ॥ आधारः । यथा । गुणनिधिः । जलनिधिः । इत्यादयः ॥ चिरप्रनष्टस्वामिकभूजातधनविशेषः । इति प्राञ्चः ॥ अज्ञातस्वामिकचिरनिखातस्वर्णादि । यथा । अधुना भूमौ चिरनिखातस्य सुवर्णादेर्निधिशब्दवाच्यस्याधिगमे विधिमाह ।
"राजा लब्ध्वा निधिं दद्यात् द्विजेभ्योऽर्द्धं द्विजः पुनः ।
विद्वानशेषमादद्यात् सर्व्वस्यासौ प्रभुर्यतः ॥
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् ।
अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ॥"
"उक्तलक्षणं निधिं राजा लब्ध्वार्द्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोषे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसम्पन्नः सदाचारो यदि निधिं लभेत तदा सर्व्वमेव गृह्णीयात् । यस्मादसौ सर्व्वस्य जगतः प्रभुः । इतरेण तु राजविद्वद्ब्राह्मणव्यतिरिक्तेनाविद्वद्ब्राह्मणक्षत्त्रियादिना निधौ लब्धे राजा षष्ठांशमधिगन्त्रे दत्त्वा शेषं निधिं स्वयमाहरेत् । यथाह वशिष्ठः । अप्रज्ञायमानं वित्तं योऽधिगच्छेत् राजा तद्धरेदधिगन्त्रे षष्ठमांशं प्रदद्यात् इति । गौतमोऽपि निध्यधिगमो राजधनं न ब्राह्मणस्याभिरूपस्याब्राह्मणोऽप्याख्याता षष्ठं अंशं लभेतेत्येक इति । अनिवेदित इति कर्त्तरि निष्ठा । अनिवेदितश्चासौ विज्ञातश्च राजा इत्यनिवेदितविज्ञातः । यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राजा स सर्व्वं निधिं दाप्यो दण्डञ्च शक्त्यपेक्षया । अथ निधेरपि स्वाम्यागत्य रूपसंख्यादिभिः स्वत्वं भावयत्ति तदा तस्मै राजा निधिं दत्त्वा षष्ठं द्वादशं वांशं स्वयमाहरेत् । यथाह मनुः ।
"ममायमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत षड्भागं राजा द्वादशमेव वेति ॥
अंशविकल्पस्तु वर्णकालाद्यपेक्षया वेदितव्यः ।"
इति मिताक्षरायां व्यवहाराध्यायः ॥
कुवेरस्य नवधा रत्नविशेषः । तत्पर्य्यायः । शेवधिः २ । इत्यमरः । १ । १ । ७४ ॥ सेवधिः ३ । इति भरतः ॥ तद्भेदा यथा,—
"पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च वर्च्चोऽपि निधयो नव ॥"
इति हारावली ॥
मार्कण्डेयपुराणे तु वर्च्च इति हित्वा अष्टावेव उक्ताः । इति भरतः ॥ * ॥ तल्लक्षणं यथा,—
"पद्मिनी नाम या विद्या लक्ष्मीस्तस्याधिदेवता ।
तदाधाराश्च निधयस्तान्मे निगदतः शृणु ॥
तत्र पद्ममहापद्मौ तथा मकरकच्छपौ ।
मुकुन्दनीलौ नन्दश्च शङ्खश्चैवाष्टमो निधिः ॥
सत्याम्टद्धां भवन्त्येते सद्भिः सह भवन्त्यमी ।
एते ह्यष्टौ समाख्याता निधयस्तव क्रोष्टुके ! ॥
एभिरालोकितं चित्तं मनुष्यस्य महामते ! ।
यादृक् स्वरूपं भवति तन्मे निगदतः शृणु ॥
पद्मो नाम निधिः पूर्व्वः स यस्य भवति द्विज ! ।
स तस्य तत्सुतानाञ्च तत्पौत्राणाञ्च नान्यगः ॥
दाक्षिण्यसारः पुरुषस्तेन चाधिष्ठितो भवेत् ।
सत्त्वाधारो महाभागो यतोऽसौ सात्त्विको
निधिः ॥
सुवर्णरौप्यताम्रादिधातूनाञ्च परिग्रहम् ।
करोत्यतितरां सोऽथ तेषाञ्च क्रयविक्रयम् ॥
करोति च यथा यज्ञान् यज्विनाञ्च प्रयच्छति ।
सम्पादयति कामांश्च सर्व्वानेव यथाक्रमम् ॥
सभादेवनिकेतांश्च स कारयति तन्मनाः । * ।
सत्त्वाधारो निधिश्चान्यो महापद्म इति श्रुतः ॥
सत्त्वप्रधानो भवति तेन चाधिष्ठितो नरः ।
करोति पद्मरागादिरत्नानाञ्च परिग्रहम् ॥
समौक्तिकप्रवालानां तेषाञ्च क्रयविक्रयम् ।
ददाति योगशीलेभ्यस्तेषामावसथांस्तथा ॥
स कारयति तच्छीलः स्वयमेव च जायते ।
तत्प्रसूतास्तथाशीलाः पुत्त्रपौत्रक्रमेण च ॥
पूर्व्वद्विंमात्रः सप्तासौ पुरुषांश्च न मुञ्चति ।
महापद्मस्तु विप्राणां यज्ञे समुपजायते ॥ * ॥
तामसो मकरो नाम निधिस्तेनावलोकितः ।
पुरुषोऽथ तमःप्रायः सुशीलोऽपि हि जायते ॥
बाणखड्गर्ष्टिधनुषां चर्म्मणाञ्च परिग्रहम् ।
दंशनानाञ्च कुरुते याति मैत्रीञ्च राजभिः ॥
ददाति शौर्य्यवृत्तीनां भूभुजां ये च तत्प्रियाः ।
क्रयविक्रयश्च शस्त्राणां नान्यत्र प्रीतिमेति च ॥
एकस्यैव भवत्येष नरस्य न सुतानुगः ।
द्रव्यार्थं दस्युतो नाशं संग्रामे वापि संव्रजेत् ॥*॥
कच्छपाख्यो निधिर्योऽन्यो नरस्तेनाभिवीक्षितः ।
तमःप्रधानो भवति यतोऽसौ तामसो निधिः ॥
व्यवहारान् शिष्टैश्च पण्यजातं करोति च ।
कर्म्मान्तानखिलांश्चैव न विश्वसिति कस्यचित् ॥
समस्तानि यथाङ्गानि निगृह्यास्ते हि कच्छपः ।
तथावष्टभ्य रत्नानि तिष्ठत्याकुलमानसः ॥
न ददाति न वा भुङ्क्ते तद्विनाशभयाकुलः ।
निधानमुर्व्यां कुरुते निधिः सोऽप्येकपुरुषः ॥*॥
रजोगुणमयश्चान्यो मुकुन्दो नाम यो निधिः ।
नरोऽवलोकितस्तेन तद्गुणो भवति द्विज ! ॥
वीणावेणुमृदङ्गादिगीतवाद्यपरिग्रहम् ।
करोति वाद्यतां वित्तं नृत्यताञ्च प्रयच्छति ॥
वन्दिमागधसूतानां विटानां लास्यपाठिनाम् ।
ददात्यहर्निशं भोगान् भुङ्क्ते तैस्तु समं द्विज ! ॥
कुलटासु रतिश्चास्य भवत्यन्यैश्च तद्विधैः ।
प्रयाति सङ्गमेकञ्च स निधिर्भजते नरम् ॥ * ॥
रजःसत्त्वमयश्चान्यो नन्दो नाम महानिधिः ।
उपैति स्तम्भमधिकं नरस्तेनावलोकितः ॥
समस्तधातुरत्नानां पण्यवाद्यादिकस्य च ।
प्रतिग्रहं करोत्येष तथैव क्रयविक्रयम् ॥
आधारः स्वजनानाञ्च आगताभ्यागतस्य च ।
सहते नावमानोक्तिं स्वल्पामपि महामुने ! ॥
स्तूयमानश्च महतीं प्रीतिं बध्नाति यच्छति ।
यं यमिच्छति वै कामं मृदुत्वमुपयाति च ॥
बह्व्यो भार्य्या भवन्त्यस्य सुतिमत्योऽतिशोभनाः ।
सन्ततौ सप्त च नरान्निधिर्नन्दोऽनुवर्त्तते ॥
प्रवर्द्धमानोऽनु नरमष्टभागेन सत्तम ! ।
दीर्घायुष्यञ्च सर्व्वेषां पुरुषाणां प्रयच्छति ॥
बन्धूनामेव भरणं ये च दूरादुपागताः ।
तेषां करोति वै नन्दः परलोके न चादृतः ॥*॥
भवत्यस्य न च स्नेहः सहवासिषु जायते ।
पूर्व्वमित्रेषु शैथिल्यं प्रीतिमन्यैः करोति च ॥
तथैव सत्त्वरजसी यो बिभर्त्ति महानिधिः ।
स नीलसंज्ञस्तत्सङ्गी नरस्तच्छीलभाग्भवेत् ॥
वस्त्रकार्पासधान्यादिफलपुष्पपरिग्रहम् ।
मुक्ताविद्रुमशङ्खानां शुक्त्यादीनां महामुने ! ॥
काष्ठादीनां करोत्येष यच्चान्यज्जलसम्भवम् ।
क्रयविक्रयमप्येषां नान्यत्र रमते मनः ॥
तड़ागान् पुष्करिण्यश्च तथारामान् करोति च ।
बन्धञ्च सरितां वृक्षांस्तथा रोपयते नरः ॥
अनुलेपनपुष्पादिभोगभुक् वापि जायते ।
त्रिपौरुषश्चापि निधिर्नीलो नामेति विश्रुतः ॥
रजस्तमोमयश्चान्यः शङ्खसंज्ञो हि यो निधिः ।
तेनापि नीयते विप्र ! तद्गुणत्वं निधीश्वरः ॥
एकस्यैव भवत्येष नरं नान्यमुपैति च ।
यस्य शङ्खो निधिस्तस्य स्वरूपं क्रोष्टुके ! शृणु ॥
एक एवात्मना मृष्टमन्नं भुङ्क्ते तथाम्बरम् ।
कदन्नभुक् परिजनो न च शोभनवस्त्रभृत् ॥
न ददाति सुहृद्भार्य्यासुतपौत्रस्नुषादिषु ।
स्वपोषणपरः शङ्खी नरो भवति सर्व्वदा ॥
इत्येते निधयः ख्याता नराणामर्थदेवताः ॥
मिश्रावलोकिनो मिश्रस्वभावफलदायिनः ।
यथाख्यातः स्वभावस्तु भवत्येकविलोकनात् ।
सर्व्वेषामाधिपत्ये च श्रीरेषां द्विज पद्मिनी ॥"
इति मार्कण्डेयपुराणे ६८ अध्याये निधिलक्षणम् ॥
(पौरववंशीयनृपविशेषः । अयं हि दण्डपाणेः पुत्त्रः । मत्स्यपुराणादिमते निरामित्रनाम्ना विख्यातः । ५० । ८७ ॥ यथा, राजावल्यां प्रथमपरिच्छेदे ।
"बुभुजे पृथिवीमेनां दण्डपाणिर्महाबलः ।
राजासने ततः सोऽपि स्थापयित्वा निधिं सुतम् ॥
स्मरन्नारायणं देवं तपसे स वनं ययौ ।
निधिस्तु विधिवद्राज्यं चकार नीतिपण्डितः ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । १७ ।
"सर्व्वः शर्व्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥"
"प्रलयकालेऽस्मिन् सर्व्वं निधीयते इति निधिः ।"
इति तद्भाष्ये शङ्करः ॥